# संस्कृतवाङ्मये शिक्षणाधिगमप्रक्रियायाः स्वरूपम्

**डॉ. मनमोहन शर्मा**
**वरिष्ठानुसन्धाता**
**संस्कृतसंवर्धनप्रतिष्ठानम्**
manmohansharma400@gmail.com

## शोधपत्रस्य सारांशः

**हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम् ।**
**तत्त्वं पूषन्नपावृणु सत्यधर्माय दृष्टये ।। (ईशावास्योपनिषद् १५)**

संस्कृतवाङ्मये ईशावास्योपनिषदः इयम् उक्तिः अत्यन्तं प्रसिद्धा गूढार्थसमन्विता च वर्तते । अस्याः अभिप्रायः अस्ति यत् स्वर्णनिर्मितेन पात्रेण आवरणेन वा सत्यम् आच्छादितम् अस्ति । यदि कश्चित् तस्य आवृतस्य सत्यस्य दर्शनमिच्छति तर्हि तस्य स्वर्णपात्रस्य आवरणस्य वा ***अपवारणं*** कर्तव्यमेव । अस्मिन् श्लोके *हिरण्मयं पात्रम्* इत्यनेन पदेन तेषां सर्वेषां ***भौतिक-मानसिक-शारीरिकादीनां तत्त्वानां*** ग्रहणं भवति, यानि सत्यस्य अर्थात् ज्ञानस्य अभिज्ञाने बाधां जनयन्ति । अत्र पूषन् इति पदं सम्बोधनम् अस्ति । प्रथमविभक्तेः एकवचने पूषा इति भवति ।

**भास्वद्विवस्वत्सप्ताश्वहरिदश्वोष्णरश्मयः ।**
**विकर्नार्कमार्तण्डमिहिरारुणपूषणः ।। (अमरकोषः १/३/२९)**

अमरकोषस्य अस्मिन् श्लोके पूषा इत्यस्य अर्थः सूर्यः इति प्रदर्शितः । ***'पुष पुष्टौ क्यादि. प. से. पुष्णाति । पूष वृद्धौ भ्वादि. प. से. पूषति वा ।'*** अनेन पूषा इत्यसस्य पदस्य ***पोषणकर्ता*** इत्यर्थः अपि ज्ञायते ।

अधुना अत्र शैक्षिकदृष्ट्या किञ्चित् विचारयामः, 'पोषणकर्ता' शिक्षकः अस्ति यः सदैव छात्राणाम् अभिवर्धनं पोषणं च इच्छति । सः सूर्यस्य इव अज्ञानरूपम् अन्धकारम् अपाकरोति, येन छात्राः सत्यस्य दर्शने अथवा विषयाणाम् अधिगमने समर्थाः भवन्ति । स्पष्टमेव यत् अत्र शिक्षकस्य भूमिका मार्गदर्शकरूपेण एव अस्ति । सूर्यः अन्धकारं निराकरोति परन्तु दर्शनं तु दर्शकेन स्वयमेव करणीयं भवति ।

अतः **'तत्त्वं पूषन्नपावृणु सत्यधर्माय दृष्टये'** इत्यत्र प्रार्थनाकर्ता सत्यस्य ज्ञानाय प्रेरितः वर्तते । निश्चयेन सः ***'ज्ञानेच्छुकः'*** अस्ति । अतः ज्ञानमवाप्तुं स्वतः परतः वा प्रेरितः एव ***छात्रः*** इति वक्तुं शक्यते । अनेन सङ्क्षिप्तविवरणेन शिक्षाप्रक्रियायाः प्रमुखाङ्गानां दिग्दर्शनं भवति । तद्यथा -

| | | | | |
|---|---|---|---|---|
| पूषा | - | अध्यापकः | - | मार्गदर्शकः, छात्राणां पोषकः |
| ज्ञानेच्छुकः | - | छात्रः | - | ज्ञानमवाप्तुं स्वतः परतः वा प्रेरितः, स्वाध्यायप्रकृतिकः |
| सत्यम् | - | अधिगमः | - | ज्ञानम् (अन्तर्निहितम्, बाधकतत्त्वैः आवृत्तम्) |
| अपवारणम् | - | विधिः | - | ज्ञाने अधिगमे वा बाधकतत्त्वानां दूरीकरणम् ।<br>अधिगमानुकूल-वातावरणस्य निर्माणम् । |
| हिरण्मयं पात्रम् | - | अधिगमे बाधकतत्त्वानि | - | तानि भौतिक-मानसिक-शारीरिकादीनि तत्त्वानि<br>यानि अधिगमे ग्रहणे बाधां जनयन्ति ।<br>(अधिगमप्रतिकूलं वातावरणम्) |

अध्ययनम्, पठनम्, अधीतिः, अवबोधः, अवगमनम्, अर्जनम् अधिगमनं च इत्येषु सर्वत्र ज्ञानग्रहणस्य प्रक्रिया एव प्रमुखा वर्तते । अथवा एवम् अपि वक्तुं शक्यते यत् अधिगमनादिषु ज्ञानं निहितं तथा ज्ञाने अधिगमनादीनीति । अत एव प्रायः सर्वैरपि भारतीयदर्शनैः ज्ञानग्रहणस्य अधिगमस्य वा कस्याश्चित् विशिष्ट-प्रक्रियायाः निरूपणम् अवश्यम् एव कृतम् । अस्यां प्रक्रियायां मनसः प्रधानभूतं स्थानं वर्तते इति ।

साङ्ख्यदर्शनानुसारम् – **सङ्कल्पकम् उभयात्मकम् इन्द्रियं मनः** इति । **'तदसाधारणेन रूपेण लक्षयति 'सङ्कल्पकमत्र मनः' इति । सङ्कल्पेन रूपेण मनो लक्ष्यते । 'आलोचितमिन्द्रियेण वस्तु इदम्' इति सम्मुग्धम् 'इदम् एवम्, न एवम्' इति सम्यक्कल्पयति विशेषणविशेष्यभावेन विवेचयतीति यावत् ।'**[1] अर्थात् सङ्कल्पवत् मनः । सङ्कल्पः अर्थात् सम्यक् विवेचनम् अथवा परीक्षणम् इति । इन्द्रियाणाम् अर्थैः सह प्राथमिकः सन्निकर्षः इदं किमपि वस्तु, विषयः, पदार्थः, द्रव्यं वा अस्ति इति रीत्या भवति । तदनन्तरं मनः विशेषणविशेष्यभावेन विषयस्य परीक्षणं विवेचनं च कृत्वा सङ्कल्पयति यत् 'इदम् इत्थम् इत्येव, न एवञ्चेति' ।

**शिक्षणाधिगमप्रक्रियायाः सम्भावितं प्रारूपम् –**




अत्र पाठ्यवस्तु ज्ञानेन्द्रियाणां विषयेषु अर्थेषु वा अन्तर्भवति । ते च अर्थाः पञ्च एव –

**पञ्चेन्द्रियार्थाः शब्दस्पर्शरूपरसगन्धाः**[2] इति

विषयवस्तु सामान्यतः *चक्षुरात्मकं, श्रवणात्मकं, घ्राणात्मकं, रसनात्मकं त्वचात्मकं* चैव भवति । पाठः प्रायः श्रवणात्मकः भवति, अतः सम्पूर्णपाठस्य ग्रहणं श्रवणेन्द्रियस्य कार्यं वर्तते, परन्तु पाठेषु नैके विषयाः तादृशाः भवन्ति येषां सम्बन्धः अन्यैः इन्द्रियैः सह अपि भवति । उदाहरणार्थम् *आमलकम् आम्लं भवति* । इति किञ्चित् वाक्यं पाठे अस्ति । वाक्यस्य ग्रहणं तु श्रवणेन्द्रियेण क्रियते परन्तु यदि छात्राः *आमलकम् आम्लम्* च इत्येतयोः पदयोः अर्थमेव न जानन्ति तर्हि श्रवणेन्द्रियेण अपि केवलं शब्दस्य एव ग्रहणं भवति न तु अर्थस्य । अत एव अध्यापकैः पाठस्य सम्पूर्णं विश्लेषणं कृत्वा इदं ज्ञातव्यं यत् पाठे पाठ्यवस्तुनः स्वरूपं कीदृशम् अस्ति ? यथा अत्र आमलकम्

---

[1] साङ्ख्यतत्त्वकौमुदी कारिकासङ्ख्या २७

[2] चरकसंहिता, सूत्रस्थानम् ८/११

इत्यस्य स्वरूपं चक्षुरात्मकं तथा आम्लम् इत्यस्य स्वरूपं रसनात्मकम् अस्ति । एवमेव कर्मेन्द्रियाणां सन्दर्भे अपि कर्तव्यम् । अतः अध्यापकैः विषयवस्तुनः सम्यक्तया अभिज्ञानं कृत्वा तस्य उपस्थापनस्य योजना निर्मातव्या । उपस्थापनान्तरं विषयस्य *इन्द्रियैः सह प्राथमिकः सन्निकर्षः* जायते । प्राथमिकः सन्निकर्षः नाम किम् ? इति जिज्ञासायाः समाधानम् उच्यते उदाहरणार्थं 'कश्चन बालः कन्दुकं पश्यति । अत्र कन्दुकस्य गोलाकारादिकं स्वरूपं चक्षुरिन्द्रियेण गृह्यते । अयमेव कन्दुकविषयेण सह चक्षुरिन्द्रियस्य प्राथमिकः सन्निकर्षः भवति । अस्यां प्रक्रियायां मनः सर्वदा इन्द्रियेषु सन्निविष्टं भवति । यतो हि मनसः सन्निवेशाभावेन विषयस्वरूपस्य इन्द्रियैः सह सन्निकर्षः नैव भवितुमर्हतीति ।

**अथ वा भवति वै कश्चिज्जाग्रदपि वर्तमानं कालं नोपलभते । तद्यथा वैयाकरणानां शाकटायनो रथमार्गे आसीनः शकटसार्थं यान्तं नोपलेभे । किं पुनः कारणं कश्चिज्जाग्रदपि वर्तमानकालं नोपलभते ? मनसा प्रयुक्तानीन्द्रियाण्युपलब्धौ कारणानि भवन्ति, मनसोऽसांनिध्यात् ।**[3] असान्निध्यात् अर्थात् अभावादिति अस्याः उक्तेः शैक्षिकनिहितार्थः अस्ति यत् यथा मनसः अन्यविषयेषु आसक्तेः कारणात् राजमार्गोपविष्टः वैयाकरणः शाकटायनः निर्गतान् रथसमूहान् पश्यन् अपि न पश्यति । तथैव प्रायः कक्षायाम् उपविष्टः छात्रः मनसः इन्द्रियैः सह असान्निध्यकारणात् विषयं न अधिगच्छति ।

अत्र शिक्षणाधिगमप्रक्रियायाः चतुर्थं सोपानं प्रवर्तते *विशेषणविशेष्यभावेन मनसः सङ्कल्पः* इति वस्तुतः अत्र अन्तःकरणं सक्रियं भवति । अन्तःकरणे मनः विशेषणविशेष्यभावेन कन्दुकस्य गोलाकारपदार्थत्वेन पुष्टिं करोति । ततस्ततः अन्तःकरणे एव अहङ्कारस्य गोलाकारयुक्तस्य कन्दुकस्य अभिज्ञानं भवति । तदनन्तरम् अधिगतविषयस्य विविधपक्षैः सम्बद्धा निश्चयात्मिका बुद्धिः उत्पद्यते । यथा उक्तमेव –

**एते प्रदीपकल्पाः परस्परविलक्षणा गुणविशेषाः ।**
**कृत्स्नं पुरुषस्यार्थं बुद्धौ प्रयच्छन्ति ॥**[4]

अर्थात् एतानि इन्द्रियाणि मनः अहङ्कारः च विषयस्य ग्रहणं कृत्वा बुद्धौ संस्थापयन्ति । पुनश्च इयं बुद्धिः विश्लेषणपुरस्सरं विविधप्रतिक्रियाणां निर्धारणं करोति । उदाहरणार्थं कन्दुकस्य सन्दर्भे क्रीडादीनां क्रियाणां निर्धारणम् । तदा आत्मनि विषयस्य ज्ञानम् अधिगमः वा उत्पद्यते । इयं प्रक्रिया चरकसंहितायाः शारीरस्थाने अत्यन्तं स्पष्टतया प्रतिपादिता वर्तते । तत्रोक्तं यत् –

**इन्द्रियेणेन्द्रियार्थो हि समनस्केन गृह्यते । जायते विषये तत्र या बुद्धिर्निश्चयात्मिका ।**
**कल्प्यते मनसा तूर्ध्वं गुणतो दोषतोऽथवा ॥**[5] **व्यवस्यति तथा वक्तुं कर्तुं वा बुद्धिपूर्वकम् ॥**[6]

- इन्द्रियाणां कर्म दर्शनादिकम् **आलोचनम्** इति कथ्यते ।
- मनसः कर्म **सङ्कल्पः** इत्युच्यते ।
- अहङ्कारस्य कर्म **अभिमानः** (अहम् अस्य विषयस्य ज्ञाता) इति ।
- बुद्धेः कर्म **अध्यवसायः** इति कथ्यते ।


[3] महाभाष्यम् ३/२/११५

[4] साङ्ख्यकारिका ३६

[5] चरकसंहिता, शारीरस्थानम् १/२२

[6] चरकसंहिता, शारीरस्थानम् १/२३

एषा शिक्षणाधिगमप्रक्रिया अनेन आरेखचित्रेण सरलतया अवगन्तुं शक्यते।




इयम् अधिगमस्य सर्वसामान्य-प्रक्रिया वर्तते।

**सन्दर्भग्रन्थाः**

ईशावास्योपनिषद्

अमरकोषः

साङ्ख्यतत्त्वकौमुदी

चरकसंहिता, सूत्रस्थानम्

साङ्ख्यकारिका